# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा, नवम्बर्-दिसम्बर्-२०१६

| कक्षा- आचार्य-२ (SEM-3) | प्रश्नपत्र-३ | गुणाः - ७० |
|---|---|---|
| विषयः- साहित्यम् | **CC-538** | समयः - ११ तः ०२ |
| दिनाङ्कः - २६/११/२०१६ | सन्दर्भग्रन्थः - रसगंगाधरः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ एकस्य ससन्दर्भ व्याख्या कार्या ।** ०४

१. रसगंगाधरस्य स्मृतापितरुणातपं....... भवतु काऽपि कादम्बिनी – इत्यस्य मङ्गलाचरणस्य व्याख्यां कुरुत ।

२. पाषाणादपि पीयूषं स्यन्दते यस्य लीलया । तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ।

**प्र-२ पण्डितराजजगन्थासस्य परिचयं सविशदं ददातु ।** १२

**अथवा**

**जगन्नाथस्य पाण्डित्यप्रतिभायाः विस्तारेणवर्णनं कुरुत ।**

**प्र-३ द्वयोः उत्तरं लिखत ।** ०४

१. पण्डितजगन्नाथः कीदृशः ब्राह्मणः आसीत्?

२. जगन्नाथस्य पितुः नाम किम्?

३. पण्डितराजजगन्नाथस्य कति ग्रन्थाः सन्ति?

**॥ द्वितीयान्वितिः ॥**

**प्र-४ द्वयोः एकस्य व्याख्या कार्या ।** ०४

१. मननतरितीर्णविद्याऽर्णवो, जगन्नाथपण्डितनरेन्द्रः ।
रसगंगाधरनाम्नीं करोति कुतुकेन कव्यमीमांसाम् ॥

२. रसगंगाधरनामा सन्दर्भोऽयं चिरं जयतु ।
किञ्च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥

**प्र-५ द्वयोः टिप्पणीं लिखन्तु ।** ०८

१. ग्रन्थोक्तं काव्यभेदवर्णनं लिखत ।

२. मध्यमकाव्यम् ।

३. अधमकाव्यम् ।

**प्र-६ त्रयाणामुत्तरं संक्षेपेण लिखत ।** ०३

१. जगन्नाथस्य जननी नाम किम्?

२. जगन्नाथस्य गुरोः नाम किम्?

३. जगन्नाथस्य काव्यलक्षणं किमस्ति?

४. गंगायाः तटे (घाटे) स्थित्वा पण्डितराजेन कस्य ग्रन्थस्य रचना कृता?

५. अधमकाव्यस्य किं लक्षणम् अस्ति?

**॥ तृतीयान्वितिः ॥**

**प्र-७ एकस्य सप्रसङ्गं व्याख्या कार्या ।** ०४

१. व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः ।

२. अश्रुपातादयोऽपि तत्तदानन्दानुभवस्वाभ्याव्यन् दुःखात् ।

**प्र-८ एकस्य उत्तरं विस्तारेण लिखत ।** १२

१. अभिनवगुप्तस्य रसस्वरूमतं जगन्नाथस्य रसमतं वर्णनीयम् ।

२. भट्टनायकस्य मतानुसारं रसनिरूपणं विस्तरेण निरूपणीयम् ।

**प्र-९ द्वौ समाधेयौ ।** ०४

१. जगन्नाथमतेन रसाः कति सन्ति?

२. नाट्ये कति रसाः सन्ति पण्डितराजमतेन?

३. वीररसस्य स्थायिभावः कः अस्ति?

**॥ चतुर्थान्वितिः ॥**

**प्र-१० एकस्य ससन्दर्भं व्याख्या कार्या ।** ०४

१. स्त्रीपुंसयोरन्योन्यालम्बनः प्रेमाख्यत्तवृत्तिविशेषोरतिः स्थायिभावः ।

२. पराक्रमदानादिस्मृतिजन्मा औन्त्याख्य उत्साहः ।

**प्र-११ एकस्य विषये टिप्पणी लेख्या ।** ०८

१. स्थायिभावाः ।

२. वीररसः ।

३. श्रृङ्गाररसः ।

**प्र-१२ त्रयाणां लघूत्तराणि लिखत ।** ०३

१. ग्रन्थोक्तस्थायिभावाः कति?

२. रतिः कस्य स्थायिभावः अस्ति?

३. बीभत्स रसस्य स्थायिभावः कः?

४. शोकः कः?

५. विस्मयः कः?